श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ विंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ विंशः सर्गः ॥

## श्रीरामकर्तृकः खरप्रहितानां राक्षसानां वधः

ततः शूर्पणखा घोरा राघवाश्रममागता।
राक्षसानाचचक्षे तौ भ्रातरौ सह सीतया ॥ **3.20.1** ॥

ते रामं पर्णशालायामुपविष्टं महाबलम्।
ददृशुः सीतया सार्धं लक्ष्मणेनापि सेवितम् ॥ **3.20.2** ॥

तां दृष्ट्वा राघवः श्रीमानागतांस्तांश्च राक्षसान्।
अब्रवीद् भ्रातरं रामो लक्ष्मणं दीप्ततेजसम् ॥ **3.20.3** ॥

मुहूर्तं भव सौमित्रे सीतायाः प्रत्यनन्तरः।
इमानस्या वधिष्यामि पदवीमागतानिह ॥ **3.20.4** ॥

वाक्यमेतत् ततः श्रुत्वा रामस्य विदितात्मनः।
तथेति लक्ष्मणो वाक्यं राघवस्य प्रपूजयन् ॥ **3.20.5** ॥

राघवोऽपि महच्चापं चामीकरविभूषितम्।
चकार सज्यं धर्मात्मा तानि रक्षांसि चाब्रवीत् ॥ **3.20.6** ॥

पुत्रौ दशरथस्यावां भ्रातरौ रामलक्ष्मणौ।
प्रविष्टौ सीतया सार्धं दुश्चरं दण्डकावनम् ॥ **3.20.7** ॥

फलमूलाशनौ दान्तौ तापसौ ब्रह्मचारिणौ।
वसन्तौ दण्डकारण्ये किमर्थमुपहिंसथ॥ **3.20.8** ॥

युष्मान् पापात्मकान् हन्तुं विप्रकारान् महाहवे।
ऋषीणां तु नियोगेन सम्प्राप्तः सशरासनः॥ **3.20.9** ॥

तिष्ठतैवात्र सन्तुष्टा नोपवर्तितुमर्हथ।
यदि प्राणैरिहार्थो वो निवर्तध्वं निशाचराः॥ **3.20.10** ॥

तस्य तद् वचनं श्रुत्वा राक्षसास्ते चतुर्दश।
ऊचुर्वाचं सुसङ्क्रुद्धा ब्रह्मघ्नाः शूलपाणयः॥ **3.20.11** ॥

संरक्तनयना घोरा रामं संरक्तलोचनम्।
परुषा मधुराभाषं हृष्टा दृष्टपराक्रमम्॥ **3.20.12** ॥

क्रोधमुत्पाद्य नो भर्तुः खरस्य सुमहात्मनः।
त्वमेव हास्यसे प्राणान् सद्योऽस्माभिर्हतो युधि॥ **3.20.13** ॥

का हि ते शक्तिरेकस्य बहूनां रणमूर्धनि।
अस्माकमग्रतः स्थातुं किं पुनर्योद्धुमाहवे॥ **3.20.14** ॥

एभिर्बाहुप्रयुक्तैश्च परिघैः शूलपट्टिशैः।
प्राणांस्त्यक्ष्यसि वीर्यं च धनुश्च करपीडितम्॥ **3.20.15** ॥

इत्येवमुक्त्वा संरब्धा राक्षसास्ते चतुर्दश।
उद्यतायुधनिस्त्रिंशा राममेवाभिदुद्रुवुः॥ **3.20.16** ॥

चिक्षिपुस्तानि शूलानि राघवं प्रति दुर्जयम्।
तानि शूलानि काकुत्स्थः समस्तानि चतुर्दश॥ **3.20.17** ॥

तावद्भिरेव चिच्छेद शरैः काञ्चनभूषितैः।
ततः पश्चान्महातेजा नाराचान् सूर्यसन्निभान्॥ **3.20.18** ॥

जग्राह परमक्रुद्धश्चतुर्दश शिलाशितान्।
गृहीत्वा धनुरायम्य लक्ष्यानुद्दिश्य राक्षसान्॥ **3.20.19** ॥

मुमोच राघवो बाणान् वज्रानिव शतक्रतुः।
ते भित्त्वा रक्षसां वेगाद् वक्षांसि रुधिरप्लुताः॥ **3.20.20** ॥

विनिष्पेतुस्तदा भूमौ वल्मीकादिव पन्नगाः।
तैर्भग्नहृदया भूमौ छिन्नमूला इव द्रुमाः॥ **3.20.21** ॥

निपेतुः शोणितस्नाता विकृता विगतासवः।
तान् भूमौ पतितान् दृष्ट्वा राक्षसी क्रोधमूर्च्छिता॥ **3.20.22** ॥

उपगम्य खरं सा तु किञ्चित्संशुष्कशोणिता।
पपात पुनरेवार्ता सनिर्यासेव वल्लरी॥ **3.20.23** ॥

भ्रातुः समीपे शोकार्ता ससर्ज निनदं महत्।
सस्वरं मुमुचे बाष्पं विवर्णवदना तदा॥ **3.20.24** ॥

निपातितान् प्रेक्ष्य रणे तु राक्षसान्
प्रधाविता शूर्पणखा पुनस्ततः।
वधं च तेषां निखिलेन रक्षसां
शशंस सर्वं भगिनी खरस्य सा॥ **3.20.25** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे विंशः सर्गः॥